श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

## ॥दशावतार स्तोत्रम्॥

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि ॥

देवो नः शुभमातनोतु दशधा निर्वर्तयन् भूमिकां
रङ्गे धामनि लब्ध निर्भर रसैरध्यक्षितो भावुकैः ।
यद्भावेषु पृथग्विधेष्वनुगुणान् भावान् स्वयं बिभ्रती
यद्धर्मैरिह धर्मिणी विहरते नानाकृतिर्नायिका ॥ १ ॥

निर्म श्रुति जाल मार्गण दशा दत्त क्षणैर्वीक्षणैः
अन्तस्तन्वदिवारविन्द गहनान्यौदन्वतीनामपाम् ।
निष्प्रत्यूह तरङ्ग रिङ्गण मिथः प्रत्यूढ पाथश्छटा -
डोलारोह सदोहलं भगवतो मात्स्यं वपुः पातु नः ॥ २ ॥

अव्यासुर्भुवन त्र्यीमनिभृतं कण्डूयनैरद्रिणा
निद्राणस्य परस्य कूर्म वपुषो निश्वास वातोर्मयः ।
यद्विक्षेपण संस्कृतो दधिपयः प्रेङ्खोलपर्यङ्किका -
नित्यारोहण निर्वृतो विहरते देवः सहैव श्रिया ॥ ३ ॥

गोपायेदनिशं जगन्ति कुहना पोत्री पवित्री कृत -
ब्रह्माण्डः प्रलयोर्मि घोष गुरुभिर्घोणा रवैर्घुर्घुरैः ।
यद्दंष्ट्रङ्कुर कोटि गाढ घटना निष्कम्प नित्य स्थितिः
ब्रह्म स्तम्बमसौदसौ भगवती मुस्तेव विश्वंभरा ॥ ४ ॥

प्रत्यादिष्ट पुरातन प्रहरण ग्रामः क्षणं पाणिजैः
अव्यात् त्रीणि जगन्त्यकुण्ठ महिमा वैकुण्ठ कण्ठीरवः ।
यत्प्रादुर्भवनादवन्ध्य जठरा याद्दच्छिकाद् वेधसां
या काचित् सहसा महासुर गृह स्थूणा पितामह्यभूत् ॥ ५ ॥

व्रीडा विद्ध वदान्य दानव यशो नासीर धाटी भटः
त्रैयक्षं मकुटं पुनन्नवतु नस्त्रैविक्रमो विक्रमः ।
यत्प्रस्ताव समुच्छ्रित ध्वज पटी वृत्तान्त सिद्धान्तिभिः
स्रोतोभिः सुरसिन्धुरष्टसु दिशा सौधेषु दोधूयते ॥ ६ ॥

क्रोधाग्निं जमदग्नि पीडन भवं संतर्पयिष्यन् क्रमात्
अक्षत्रामपि सन्ततक्ष य इमां त्रिःसप्त कृत्वः क्षितिम् ।
दत्वा कर्मणि दक्षिणां क्वचन तामास्कन्द्य सिन्धुं वसन्
अब्रह्मण्यमपाकरोतु भगवानाब्रह्म कीटं मुनिः ॥ ७ ॥

पारावार पयो विशोषण कला पारीण कालानल -
ज्वाला जाल विहार हारि विशिख व्यापार घोर क्रमः ।
सर्वावस्थ सकृत्प्रपन्न जनता संरक्षणैक व्रती
धर्मो विग्रहवानधर्म विरतिं धन्वी स तन्वीत नः ॥ ८ ॥

फक्कत्कौरव पट्टण प्रभृतयः प्रास्त प्रलम्बादयः
तालाङ्कस्य तथाविधा विहृतयस्तन्वन्तु भद्राणि नः ।
क्षीरं शर्करयेव याभिरपृथग्भूताः प्रभूतैर्गुणैः
आकौमारकमस्वदन्त जगते कृष्णस्य ताः केलयः ॥ ९ ॥

नाथायैव नमःपदं भवतु नश्चित्रैश्चरित्र क्रमैः
भूयोभिर्भुवनान्यमूनि कुहना गोपाय गोपायते ।

कालिन्दी रसिकाय कालिय फणि स्फार स्फटा वाटिका -
रङ्गोत्सङ्ग विशङ्क चंक्रमधुरा पर्यायचर्या यते॥ १०॥

भाविन्या दशया भवन्निह भव ध्वंसाय नः कल्पतां
कल्की विष्णुयशस्सुतः कलि कथा कालुष्य कूलंकषः।
निःशेष क्षत कण्टके क्षितितले धारा जलौघैर्ध्रुवं
धर्मं कार्तयुगं प्ररोहयति यन्निस्त्रिंश धाराधरः॥ ११॥

इच्छा मीन विहार कच्छप महा पोत्रिन् यदृच्छा हरे
रक्षा वामन रोष राम करुणा काकुत्स्थ हेला हलिन्।
क्रीडा वल्लव कल्क वाहन दशा कल्किन्निति प्रत्यहं
जल्पन्तः पुरुषाः पुनन्ति भुवनं पुण्यौघ पण्यापणाः॥

विद्योदन्वति वेङ्कटेश्वरकवौ जातं जगन्मङ्गलं
देवेशस्य दशावतार विषयं स्तोत्रं विवक्षेत यः।
वक्त्रे तस्य सरस्वती बहु मुखी भक्तिः परा मानसे
शुद्धिः कापि तनौ दिशासु दशसु ख्यातिः शुभा जृम्भते॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥



rmvenkat@yahoo.com